# श्रीगणपत्यथर्वशीर्षोपनिषत् गणपत्युपनिषत् सस्वर

## गणेशाथर्वशीर्षम्

ॐ भ॒द्रं कर्णे॑भिः शृणु॒याम॑ देवाः । भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः ।

स्थि॒रैरङ्गै॑स्तुष्टु॒वाꣳ स॑स्त॒नूभिः॑ । व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ ।

स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः । स्व॒स्ति नः॑ पूषा वि॒श्ववे॑दाः ।

स्व॒स्ति न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः । स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

ॐ नम॑स्ते ग॒णप॑तये । त्वमे॒व प्र॒त्यक्षं॒ तत्त्व॑मसि ।

त्वमे॒व के॒वलं॒ कर्ता॑ऽसि । त्वमे॒व के॒वलं॒ धर्ता॑ऽसि । त्वमे॒व के॒वलं॒ हर्ता॑ऽसि ।

त्वमेव सर्वं॑ खल्विदं॑ ब्रह्मा॒सि । त्वं साक्षादात्मा॑ऽसि नि॒त्यम् ॥ १॥

ऋतं वच्मि । सत्यं वच्मि ॥ २॥

अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव धातारम् ।

अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् ।

अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् ।

सर्वतो मां पाहि पाहि समन्तात् ॥ ३॥

त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाऽद्वितीयोऽसि ।

त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि ॥ ४॥

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति ।

सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति ।

त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ॥ ५॥

त्वं गुणत्रयातीतः । त्वं अवस्थात्रयातीतः । त्वं देहत्रयातीतः ।

त्वं कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः ।

त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं

वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥ ६॥

गणादिं पूर्वमुच्चार्य वर्णादिंस्तदनन्तरम् । अनुस्वारः परतरः । अर्धेन्दुलसितम् ।
तारेण ऋद्धम् । एतत्तव मनुस्वरूपम् । गकारः पूर्वरूपम् । अकारो मध्यमरूपम् ।
अनुस्वारश्चान्त्यरूपम् । बिन्दुरुत्तररूपम् । नादः सन्धानम् । सꣳहिता सन्धिः ।
सैषा गणेशविद्या । गणक ऋषिः । निचृद्गायत्रीच्छन्दः ।
गणपतिर्देवता । ॐ गं गणपतये नमः ॥ ७॥

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥ ८॥

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ।
रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ।
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ।
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ ९॥

नमो व्रातपतये । नमो गणपतये । नमः प्रमथपतये ।
नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमः ॥ १०॥

एतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्न बाध्यते ।

स सर्वतः सुखंमेधते । स पञ्चमहापापाँत् प्रमुच्यते ।

सायमंधीयानो दिवसकृतं पापं नाशयति । प्रातरंधीयानो रात्रिकृतं पापं नाशयति ।

सायं प्रातः प्रंयुञ्जानो पापोऽपांपो भवति । सर्वत्राधीयानोऽपविंघ्नो भवति ।

धर्मार्थकाममोक्षं च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् ।

यो यदि मोंहाद् दास्यति स पापींयान् भवति ।

सहस्रावर्तनाद्यं यं कामंमधीते तं तमनेंन साधयेत् ॥ ११॥

अनेन गणपतिमंभिषिञ्चति स वांग्मी भवति ।

चतुर्थ्यामनंश्नन् जपति स विद्यांवान् भवति । इत्यथर्वणवाक्यम् ।

ब्रह्माद्यावरंणं विद्यान्न बिभेति कदांचनेति ॥ १२॥

यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपंमो भवति ।

यो लांजैर्यजति स यशोंवान् भवति । स मेधांवान् भवति ।

यो मोदकसहस्रेंण यजति स वाञ्छितफलमंवाप्नोति ।

यः साज्य समिंद्भिर्यजति स सर्वं लभते स संर्वं लभते ॥ १३॥

अष्टौ ब्राह्मणान् सम्यग् ग्रांहयित्वा सूर्यवर्चंस्वी भवति ।

सूर्यग्रहे मंहानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमंन्त्रो भवति ।

Visit: www.vedicgrace.com | Phone: +91-98993-83340

महाविघ्नाँत् प्रमुच्यते । महादोषाँत् प्रमुच्यते । महापापाँत् प्रमुच्यते ।

महाप्रत्यवायाँत् प्रमुच्यते । स सर्वविद्भवति स सर्वविद्भवति ।

य एवं वेद । इत्युपनिषत् ॥ १४॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिः । व्यशेम देवहितं यदायुः ।

स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥